**कुटजगति** स्त्री "कुटजगतिर्नजौस्ततस्तौ गुरुः" वृ॰र॰टी॰ उक्ते छन्दोभेदे

**कुटजपुटपाक** पु॰ चक्रदत्तोक्ते अतिसाररोगनाशके औषधभेदे यथा "स्निग्धं घनं कुटजवल्कमजन्तुजग्धमादाय तत्क्षणमतीव च पाचयित्वा। जम्बूपलाशपुटतण्डुलतोयसिक्तं बद्धं कुशेन च बहिर्घनपङ्कलिप्तम्। सुस्विन्नमेतदवपीड्य रसं गृहीत्वा क्षौद्रेण युक्तमतिसारवते प्रदद्यात्। कृष्णात्रिपुत्त्रमतपूजित एष योगः सर्वातिसारहरणेष्वयमेव राजा"।

**कुटजरस** पु॰ चक्र॰ उक्ते अर्शोनाशके रसभेदे यथा— "कुटजत्वचो विपाच्य शतपलमार्द्रं महेन्द्रसलिलेन। यावत् स्यादरसं तद्द्रव्यं स्वरसस्ततो ग्राह्यः। मोचरसः समङ्गा फलिनी पलांशिभिस्त्रिभिस्तैश्च। वत्सकबीजं तुल्यं चूर्णीकृतमत्र दातव्यम्। पूतोत्क्वाथितः सान्द्रः स रसो दर्वीप्रलेपनो ग्राह्यः। मात्राकालोपहिता रसक्रियैषा जयत्यसृक्स्रावम्। छागलीपयसा युक्ता पेया मण्डेनाथवा यथाग्निबलम्। जीर्णौषधश्च शालीन् पयसा छागेन भुञ्जीत। रक्तं गुदजातीसारं शूलं सासृग्रुजो निहन्त्याशु। बलवच्च रक्तपित्तं रसक्रियैषा ह्युभयभागम्"।

**कुटजलेह** पु॰ चक्रदत्तोक्ते अतिसारनाशके लेहभेदे यथा "शतं कुटजमूलस्य क्षुण्णं तोयार्मणैः पचेत्। क्वाथे पादावशेषेऽस्मिन् लेहं पूते पुनः पचेत्। सौवर्चलयवक्षारविडसैन्धवपिप्पलीम्। धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयम्। लिह्याद्बदरमात्रं तत् शीतं क्षौद्रेण संयुतम्। पक्वापक्वमतीसारं नानावर्णं सवेदनम्। दुर्वारं ग्रहणीरोगं जयेच्चैव प्रवाहिकाम्"।

अर्शोरोगनाशके तत्रोक्ते २लेहभेदे च यथा— "कुटजत्वक्पलशतं जलद्रोणे विपाचयेत्। अष्टभागावशिष्टन्तु कषायमवतारयेत्। वस्त्रपूतं पुनः क्वाथं पचेल्लेहत्वमागतम्। भल्लातकविडङ्गानि त्रिकटु त्रिफलान्तथा। रसाञ्जनं चित्रकञ्च कुटजस्य फलानि च। वचामतिविषां विल्वं प्रत्येकञ्च पलं पलम्। त्रिंशत्पलानि गुडस्य चूर्णीकृत्य निधापयेत्। मधुनः कुड़वं दद्यात् घृतस्य कुड़वन्तथा। एष लेहः शमयति चार्शोरक्तसमुद्भवम्। वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्। ये च दुर्नामजा रोगास्तान् सर्वान् नाशयत्यपि। अम्लपित्तमतीसारं पाण्डुरोगमरोचकम्। ग्रहणीमार्द्दवं कार्श्यं श्वयथुं कामलामपि। अनुपानं घृतं दद्यात् मधु तक्रं जलं पयः। रोगानीकविनाशाय कौटजो लेह उच्यते"।

**कुटजवीज** न॰ ६त॰। इन्द्रयवे भावप्र॰।

**कुटजा** स्त्री "सजसा भवेदिह सगौ कुटजाख्यम् वृ॰र॰उक्तलक्षणे छन्दोभेदे

**कुटजाद्यघृत** न॰ चक्रोदत्तोक्ते शूलादिरोगनाशके घृतभेदे यथा "कुटजफलवल्कलकेशरनीलोत्पललोध्रधातकीकल्कैः। सिद्धं घृतं विधेयं शूलरक्तार्शसां भिषजा"।

**कुटजाष्टक** पु॰ चक्रदत्तोक्ते अतिसारादिरोगनाशके औषधभेदे यथा "तुलामथार्द्रां गिरिमल्लिकायाः संक्षुद्य पक्त्वा रसमाददीत। तस्मिन् सुपूते पलसम्मितानि श्लक्ष्णानि पिष्ट्वा सह शाल्मलेन। पाठां समङ्गातिविषां समुस्तां विल्वं च पुष्पाणि च धातकीनाम्। प्रक्षिप्य भूयो विपचेत् तु तावत् दर्वीप्रलेपः स्वरसस्तु यावत्। पीतस्त्वसौ कालविदा जलेन मण्डेन वाऽजापयसाऽथवाऽपि। निहन्ति सर्वं त्वतिसारमुग्रम् कृष्णं सितं लोहितपीतकं वा। दोषं ग्रहण्या विविधं च रक्तं शूलं तथार्शांसि सशोणितानि। असृग्दरञ्चैवमसाध्यरूपं निहन्त्यवश्यं कुटजाष्टकोऽयम्।

**कुटन्नट** पु॰ कुटन् सन् नटति नट—अच्। १श्योनाकवृक्षे (शोना) अमरः २कैवर्त्तीमुस्तके (केशुर) न॰अमरः अत्र कुटच्चक इति पाठान्तरम्

**कुटप** पु॰ कुट—कपन्। १मुनौ २गृहसमीपस्थोपवने, ३कुडवरूपमानभेदे च। ४पद्मे न॰हेम॰ [अमरटीका

**कुटर** पु॰ कुट—करन्। मन्थानदण्डस्थरज्जुबन्धनस्तम्भे

**कुटरु** पु॰ कुट—अरु। वस्त्रगृहे (कानात्) उज्ज्वल॰ तस्य कौटिल्यकरणयोगत्वात्तथात्वम्। [(तेओडि) रत्नमा॰

**कुटरुणा** स्त्री कुटेषु वृक्षेष्वरुणा शक॰। त्रिवितायाम्

**कुटल** न॰ कुट—कलच्। (चाल) छदिषि पटले हारा॰।

**कुटहारिका** स्त्री कुटं घटं हरति हृ—ण्वुल् अत इत्त्वम्। दास्यां हेम॰। १घटस्य हारकमात्रे त्रि॰। कुटहारकः

**कुटि** स्त्री कुट—इन्। गृहे "ब्रह्महा द्वादश समाः कुटिं कृत्वा वने वसेत्" मनुः वा ङीप्। "वृद्धकुट्यां प्रभातवृत्तान्तमनुहरति" खण्ड॰ कुटीचकः कुटीचरः। भावे इन्। २कौटिल्ये स्त्री वा ङीप् "भ्रुकुटीकुटिलात्तस्याः" देवीमा॰। ३वृक्षे पु॰शब्दरत्ना॰४देहे पु॰सि॰कौ॰। अल्पार्थे क कुटिका क्षुद्रगृहे(कुंडे) स्त्री "शिरसोमुण्डनाद्वापि न स्यात्कुटिकासनात्। भा॰, व॰,१३४५४, ५कर्त्तरि इन्। ५कौटिल्यान्विते त्रि॰।